# 2023

***Time - 3 hours***

***Full Marks - 80***

*Answer **all units** as per instructions.*
*Figures in the right hand margin indicate marks.*

**UNITS – I & II**

१ । आकाशादवतरन्तं नारदं पठितांशमवलम्ब्य वर्णयत । (१५

अथवा

कृष्णनारदयोः परस्पराभ्यर्थनां सत्प्रकारं च प्रतिपादयत ।

२ । सप्रसङ्गं व्याख्यां कुरुत । (१०

उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथं च न ।
बहिर्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः ॥

अथवा

अभूदभूमिः प्रतिपक्षजन्मनां भियां तनूजस्तपनद्युतिर्दितेः ।
यमिन्द्रशब्दार्थनिषूदनं हरेर्हिरण्यपूर्वं कशिपुं प्रचक्षते ॥

३ । त्रयाणां संक्षिप्तमुत्तरं लिखत । (५ × ३

(क) नारदः कथं द्वारकापुरीम् आगतः ?

(ख) कथं नारदः हिमालयसदृशः परिदृश्यः आसीत् ?

(ग) शिशुपालस्य जन्मवृत्तान्तं वर्णयत ।

(घ) कथं देवर्षिः बलरामसदृशः दृश्यते ?

(ङ) रावणस्य पराक्रमः कीदृशः आसीत् ?

**UNITS – III & IV**

४। दुर्योधनस्य राज्यशासनप्रकारं वर्णयत । (१५

अथवा

भारवेः राजनीतिज्ञानं पठितांश सम्मतं प्रकाशयत ।

५। सप्रसङ्गं व्याख्यां कुरुत । (१०

क्रियासु युक्तैर्नृपचारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः ।।

अथवा

स यौवराज्ये नवयौवनोद्धतं
निधाय दुःशासनमिद्धशासनः ।
मखेष्वखिन्नोऽनुमतः पुरोधसा
धिनोति हव्येन हिरण्यरेतसम् ।।

६ । त्रयाणां संक्षिप्तमुत्तरं प्रदेयम् ।　　　　(५ × ३

(क) वनेचरः किं कृत्वा किंभूतां वाचम् आददे ?

(ख) किंभूतेषु नृपेषु अमात्येषु च सर्वसम्पदः रतिं कुर्वते ?

(ग) अवन्ध्यकोपस्य अमर्षशून्यस्य च जनस्य का परिणतिः ?

(घ) वने युधिष्ठिरस्य का दयनीयता आसीत् ?

(ङ) के कथं पराभवं व्रजन्ति ?